श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीभगवद्ध्यानसोपानम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीभगवद्ध्यानसोपानम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

अन्तर्ज्योतिः किमपि यमिनामञ्जनं योगदृष्टेः
चिन्तारत्नं सुलभमिह नः सिद्धिमोक्षानुरूपम्।
दीनानाथव्यसनशमनं दैवतं दैवतानां
दिव्यं चक्षुः श्रुतिपरिषदां दृश्यते रङ्गमध्ये॥ १ ॥

वेलातीतश्रुतिपरिमळं वेधसां मौलिसेव्यं
प्रादुर्भूतं कनकसरितः सैकते हंसजुष्टे।
लक्ष्मीभूम्योः करसरसिजैर्लालितं रङ्गभर्तुः
पादाम्भोजं प्रतिफलति मे भावनादीर्घिकायाम्॥ २ ॥

चित्राकारां कटकरुचिभिश्चारुवृत्तानुपूर्वां
काले दृत्यद्रुततरगतिं कान्तिलीलाकलाचीम्।
जानुच्छायाद्विगुणसुभगां रङ्गभर्तुर्मदात्मा
जङ्घां दृष्ट्वा जननपदवीजाङ्घिकत्वं जहाति॥ ३ ॥

कामारामस्थिरकदलिकास्तम्भसम्भावनीयं
क्षौमाश्लिष्टं किमपि कमलाभूमिनीळोपधानम्।
न्यञ्चत्काञ्चीकिरणरुचिरं निर्विशत्यूरुयुग्मं
लावण्यौघद्वयमिव मतिर्मामिका रङ्गयूनः॥ ४ ॥

सम्प्रीणाति प्रतिकलमसौ मानसं मे सुजाता
गम्भीरत्वात् क्वचन समये गूढनिक्षिप्तविश्वा।
नालीकेन स्फुरितरजसा वेधसो निर्मिमाणा
रम्यावर्तद्युतिसहचरी रङ्गनाथस्य नाभिः॥ ५ ॥

www.prapatti.com

श्रीवत्सेन प्रथितविभवं श्रीपदन्यासधन्यं
 मध्यं बाह्वोर्मणिवररुचा रञ्जितं रङ्गधाम्नः।
सान्द्रच्छायं तरुणतुलसीचित्रया वैजयन्त्या
 सन्तापं मे शमयति धियश्चन्द्रिकोदारहारम्॥ ६ ॥

एकं लीलोपहितमितरं बाहुमाजानुलम्बं
 प्राप्ता रङ्गे शयितुरखिलप्रार्थनापारिजातम्।
दृप्ता सेयं दृढनियमिता रश्मिभिर्भूषणानां
 चिन्ताहस्तिन्यनुभवति मे चित्रमालानयन्त्रम्॥ ७ ॥

साभिप्रायस्मितविकसितं चारुबिम्बाधरोष्ठं
 दुःखापायप्रणयिनि जने दूरदत्ताभिमुख्यम्।
कान्तं वक्त्रं कनकतिलकालङ्कृतं रङ्गभर्तुः
 स्वान्ते गाढं मम विलगति स्वागतोदारनेत्रम्॥ ८ ॥

माल्यैरन्तः स्थिरपरिमलैर्वल्लभास्पर्शमान्यैः
 कुप्यच्चोळीवचनकुटिलैः कुन्तलैः श्लिष्टमूले।
रत्नापीडद्युतिशबळिते रङ्गभर्तुः किरीटे
 राजन्वत्यः स्थितिमधिगता वृत्तयश्चेतसो मे॥ ९ ॥

पादाम्भोजं स्पृशति भजते रङ्गनाथस्य जङ्घाम्
 ऊरुद्वन्द्वे विलगति शनैरूर्ध्वमभ्येति नाभिम्।
वक्षस्यास्ते वलति भुजयोर्मामिकेयं मनीषा
 वक्त्राभिख्यां पिबति वहते वासनां मौळिबन्धे॥ १० ॥

कान्तोदारैरयमिह भुजैः कङ्कणज्याकिणाङ्कैः
 लक्ष्मीधाम्नः पृथुळपरिघैर्लक्षिताभीतिहेतिः।
अग्रे किञ्चिद्भुजगशयनः स्वात्मनैवात्मनः सन्
 मध्येरङ्गं मम च हृदये वर्तते सावरोधः॥ ११ ॥

रङ्गास्थाने रसिकमहिते रञ्जिताशेषचित्ते
 विद्वत्सेवाविमलमनसा वेङ्कटेशेन क्लृप्तम्।


www.prapatti.com

अक्लेशेन प्रणिहितधियामारुरुक्षोरवस्थां
भक्तिं गाढां दिशतु भगवद्ध्यानसोपानमेतत्॥ १२॥

॥ इति श्रीभगवद्ध्यानसोपानं समाप्तम्॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥

www.prapatti.com